अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड—क (20) + खण्ड—ख (4+4)] एवं 10 पृष्ठाः सन्ति।

Roll No.
अनुक्रमांक

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No.** **53/SS/O/S**
**कोड नं०**

**Set/सेट** **A**

# संस्कृतम्

## (309)

Day and Date of Examination ..........................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. .......................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. .......................................................

---

***सामान्य अनुदेशाः —***

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 53/SS/O/S, सेट A अवश्यमेव लेखनीया।

# संस्कृतम्

## (309)

समयः —होरात्रयम् ] [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिकः पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

### खण्ड—क

### केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत— 6

(क) क्रोधोऽनर्थकारकः

(ख) परार्थे आत्मोत्सर्गः

(ग) राजते खलु कन्याकुमारी

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत— 1×4=4

वस्तुतः संस्कृते बहुमूल्यज्ञानं निहितम् अस्ति। मानवः जन्मतः त्रिभिः ऋणैः सह जायते। तेषु एकम् ऋषिऋणम्। अस्माकं पूर्वजाः ऋषयः महता कष्टेन ज्ञानं सम्पादितवन्तः। यदि वयं स्वाध्यायं कुर्मः तर्हि न केवलम् ऋषिऋणम् अपितु समाजऋणम् अपि अपाकृतं भवति।

**प्रश्नाः**

(क) मानवः जन्मतः कति ऋणैः सह जायते?

(ख) ऋणेषु एकं प्रमुखम् ऋणं किमस्ति?

(ग) समाजऋणं केन अपाकृतं भवति?

(घ) ऋषयः ज्ञानं कथं सम्पादितवन्तः?

**3.** अधोलिखितानां प्रश्नानाम् उचितम् उत्तरं कोष्ठकात् चित्वा लिखत— 1×4=4

(क) वेदम् अनूच्य आचार्यः कम् अनुशास्ति? (सामाजिकम् / अन्तेवासिनम्)

(ख) शैवालघोषो नाम पर्वतः कस्मिन् प्रदेशे अस्ति? (मध्यदेशे / उत्तरदेशे)

(ग) वेदाङ्गानि कति सन्ति? (पञ्च / षट्)

(घ) कः प्रथमः त्वक् प्रत्यारोपकः प्रसिद्धः? (जीवकः / सुश्रुतः)

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* मनसः अशान्तिः बहुरोगान् जनयति।

*(ii)* सुरैः असुरैः मुनिभिः नरैः च सरस्वती वन्दनीया।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* अन्तरिक्षयात्रायै कल्पनाचावलायाः कुत्र चयनं जातम्?

*(ii)* संस्कृतवाङ्मये केषां ग्रन्थानां भाण्डागारः अस्ति?

**5.** एतत् कथनं कः कम्प्रति कथयति? 2

(क) ध्रुवसेन, किमागतो नन्दपुत्रः?

(ख) अतिथीनां सेवा अस्माकं धर्मः। यथेच्छं भोज्यं पेयं च लप्स्यध्वे।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2×2=4

(क) नित्यं स्नेहार्द्रशिरसः शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च॥

**प्रश्नद्वयम्—**

*(i)* कस्य शिरसि पीडा न भवति?

*(ii)* खालित्यम् इत्यस्य कः अर्थः?

(ख) अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं पतितैः फलैः॥

**प्रश्नद्वयम्—**

*(i)* कः सर्वभूतेषु अहिंस्रः आसीत्?

*(ii)* सः केन प्रकारेण आहारम् अकरोत्?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत् प्रियहितवचनस्य धर्मनिरतस्य॥

अन्वयः —

कुलकमलदिनेशः कः _____ अपि सति यः नम्रः एतत् जगत् कस्य _____ ? प्रियहितवचनस्य धर्मनिरतस्य।

(ख) दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री न सा स्नेहेन वर्तते॥

अन्वयः —

भिन्नम्, दुःखेन, श्लिष्यते, _____ दुःखेन, भिद्यते, या, मैत्री, भिन्ना श्लिष्टा, सा, तु, _____ न वर्तते।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) किं वाचां मण्डनं सत्यम्।

भावार्थः —

सत्येन एव _____ पवित्रा जायते।

(ख) मा भ्राता भ्रातरं द्विक्षत्।

भावार्थः —

भ्राता भ्रातरं प्रति _____ तिष्ठेत्।

**9.** 'अ' स्तम्भस्य पद्यांशं 'ब' स्तम्भेन सह मेलयत— 2

| **स्तम्भ—अ** | | **स्तम्भ—ब** | |
|---|---|---|---|
| *(i)* | आयापयामास तदा | (क) | हिमं न सौभाग्यविलोपि जातम् |
| *(ii)* | अक्रोधेन जयेत् क्रोधम् | (ख) | ममत्वमुच्चैः शिरसां सतीव |
| *(iii)* | क्षुद्रेऽपि नूनं शरणं प्रपद्ये | (ग) | गोमायुर्वध्यतामिति |
| *(iv)* | अनन्तरत्नप्रभवस्य यस्य | (घ) | असाधुं साधुना जयेत् |

**10.** 'काले फलति सौभाग्यम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दवः दत्ताः — 6

**बिन्दवः**

प्रजावत्सलः एकः बुद्धिमान् नृपः कमपि स्वराज्ये निर्धनं द्रष्टुं न इच्छति स्म, सभायां लब्धदत्तः निर्धनः जीर्णवस्त्रधारी प्रविशति तस्मै एकं बीजपूरफलं यच्छति, तत्फलं व्यापारी तस्मात् क्रीणाति, राज्ञे च ददाति, लब्धदत्तं पुनः फलं नृपः ददाति, राज्ञः आदेशेन लब्धदत्तः फलं खंडयति, फलात् रत्नानि, प्राप्नोति, लब्धदत्तस्य सौभाग्यं फलति।

**11.** (क) अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत—

साधुः : जयतु महाराजः। एकम् अपूर्वं फलं भवते अर्पयितुम् आगतोऽहम्। कृपया स्वीकरोतु।

राजा : (गृहीत्वा साश्चर्यम्) अहो, एतत् तु तदेव फलम्। भोः साधो! कुतः प्राप्तम् एतत् फलम्?

साधुः : राजन्, मार्गे एकः अतीव निर्धनः जनः एतत् फलं विक्रीणाति स्म। दिव्यं प्रकाशमानम् एतत् फलं दृष्ट्वा अहम् एकं रूप्यकं दत्त्वा क्रीतवान् अत्र च आनीतवान्।

राजा : अतिशोभनम्। भवान् मम अतिथिगृहे विश्रान्तिम् अनुभवतु।

साधुः : कृतज्ञोऽस्मि राजन्। (गच्छति)

**प्रश्नाः** 1×2=2

*(i)* साधुः राज्ञे किं दातुम् आगतः?

*(ii)* साधुः फलं कस्मात् क्रीतवान्?

(ख) विस्तीर्णलोहितमुखः परिवृत्तनेत्रो,
भग्नांसकण्ठकटिजानुकरोरुजङ्घः।
विच्छिन्नहारपतिताङ्गदलम्बसूत्रो
वज्रप्रभग्नशिखरः पतितो यथाद्रिः॥

**प्रश्नाः** 1×2=2

*(i)* वज्रप्रभग्नशिखरः पर्वत इव कः आसीत्?

*(ii)* सः केन पातितः?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्तप्रश्नान् उत्तरत—

(क) **गद्यांशः**

प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः जातः। सः विविधान् अत्याचारान् कृत्वा जनान् पीडयति स्म। जनाः देवं विष्णुं प्रार्थितवन्तः देवः अवदत्—अस्य वधः पराशक्त्या कुमार्या करिष्यते।

**प्रश्नाः**

*(i)* मदोन्मत्तः कः जातः? 1

*(ii)* सः कथं जनान् पीडयति स्म? 2

*(iii)* बाणासुरस्य वधः कया कृतः? 2

(ख) **पद्यांशः**

संतोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्॥

**प्रश्नाः**

*(i)* केन अमृतेन तृप्ताः जनाः सुखं प्राप्नुवन्ति? 1

*(ii)* कस्य चित्तं शान्तं भवति? 2

*(iii)* कः सुखं न लभते? 2

**13.** मञ्जूषापदसहायतया 'मम विद्यालयः' इति विषयमधिकृत्य दशवाक्यानि लिखत— 1×10=10

**मञ्जूषा**

नगरस्य, रम्ये, वातावरणे, एकान्ते, रमणीये स्थाने विद्यालयः अस्ति, नातिदूरं नगरात् सुगम्यम्, तत्र त्रिंशत् कक्षाः पुस्तकालयः, प्रायोगिककार्यशाला, विज्ञानकक्षाः सन्ति, महान्तः शिक्षाविदः प्रायार्यः, विंशतिः स्वविषयेषु प्रशिक्षिताः शिक्षकाः, एकः तरणतालः, क्रीडाक्षेत्रम्, उत्तमम् अनुशासनं परीक्षाफलम् अपि, सर्वश्रेष्ठम्।

**14.** भवान् ब्रजेशः। माध्यमिककक्षासु पाठनार्थं संस्कृत-शिक्षकस्य नियुक्त्यै प्रकाशितविज्ञापनानुसारम् एकम् आवेदनपत्रं लखनऊस्थितं ज्ञानभारतीविद्यालयस्य प्राचार्यं प्रति लिखतु। 6

**15.** भवतः नाम गिरीशः। स्वमित्रेण प्रियव्रतेन सह संस्कृतभाषायाः महत्त्वविषये वार्तां कुर्वन् संवादम् एकं लिखतु। चत्वारि वाक्यानि लिखतु। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— ½×2=1

(क) जयेत् सत्येन चानृतम्

(ख) सन्तोषामृत-तृप्तानाम्

**17.** (क) रेखाङ्कितपदे का विभक्तिः किं च मूलपदम्? 2

परदुःखेन के दुःखिनः भवन्ति।

(ख) रेखाङ्कितपदद्वयं लृट्लकारे परिवर्त्य लिखत— 2

तदहं स्मरामि। यद् भर्त्ता आज्ञापयति।

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×4=4

(क) गुणाः पूजास्थानं ______ न च लिङ्गं न च वयः। (गुणिन् + उचितविभक्ति)

(ख) ते तत्र ______ ध्वनन्ति। (वंशी + उचितविभक्ति)

(ग) अधमानां कृते ______ किमपि महत्त्वं न वर्तते। (जीवनमूल्य + उचितविभक्ति)

(घ) कस्तूरी ______ जायते। (मृग + उचितविभक्ति)

**19.** यथानिर्दिष्टं कुरुत— 1×4=4

(क) चक्रधरस्य मस्तकात् किम् अवहत्? (रेखाङ्कितपदस्य विग्रहं कुरुत)

(ख) एवम् उक्त्वा सः निर्गतः। (अव्ययं चिनुत)

(ग) पुत्तलिका कथां कथयति। (कर्मवाच्ये परिवर्तनं कुरुत)

(घ) ततः शार्दूलजननी मृगराजं सम्बोधयितुम् आगमत्। (प्रत्ययं चिनुत)

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) घनोपगूढं गगनं न तारा।

(ख) वयं परियोजनाकार्यं कुर्मः।

## खण्ड—ख

## वैकल्पिक–I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| स्तम्भ—अ | | स्तम्भ—ब | |
|---|---|---|---|
| *(i)* | भक्तिगीतसुधा | (क) | राजेन्द्रमिश्रः |
| *(ii)* | भारतशतकम् | (ख) | रामभद्राचार्यः |
| *(iii)* | स्वातन्त्र्यवीरशतकम् | (ग) | श्रीकृष्णसेमवालः |
| *(iv)* | इन्दिराकीर्तिशतकम् | (घ) | श्रीधरभास्करवर्णेकरः |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत— 2

$10^3$, $10^{10}$, $10^{11}$, $10^{12}$

(ख) शून्यं संस्कृतभाषायाम् अस्तित्वं सूचयति न वा? शून्यस्य संकेतः पिंगलस्य कस्मिन् ग्रन्थे लभ्यते? 2

(ग) 'ग्रहणस्वरूपम्' कस्मिन् शास्त्रे वर्णितम्? 1

(घ) विमानशास्त्रस्य रचयिता कः अस्ति? गर्गरचितस्य विमानशास्त्रसंबद्धस्य ग्रंथस्य किं नाम अस्ति? 2

**23.** आधुनिकभारतीयभाषाणाम् उद्भवः कस्मात् अपभ्रंशात् मन्यते? तमिल इति कस्य भाषा-परिवारस्य भाषा? 2

**24.** (क) भारतीयसंस्कृतेः कति मूलतत्त्वानि सन्ति? मानवजीवने च विकासस्य कति आश्रमाः सन्ति? 2

(ख) शरीरत्यागानन्तरं कः संस्कारः क्रियते? 1

(ग) संस्कारैः केषाम् अपाकरणं भवति?

1

## वैकल्पिक–II

## ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) संस्कृतं विश्वस्य _____ भाषा अस्ति।

(ख) प्रहेलिकानाम् अर्थबोधनप्रकारः _____ भवति।

(ग) सूर्यादिग्रहाणां गतयः _____ शास्त्रे निरूपिताः।

(घ) आकाशवाणीतः वयं _____ प्रातः सायं च संस्कृतवार्तानां प्रसारणं शृणुमः।

**22.** अधोलिखितान् प्रश्नान् उत्तरत— 1×4=4

(क) दूरदर्शनस्य प्रसिद्धाः प्रणालिकाः कति सन्ति?

(ख) संस्कृतवार्ताः कुत्र सर्वदा श्रोतुम् उपलभ्यन्ते?

(ग) श्रावणमासे संस्कृतदिवसे दूरदर्शनेन कीदृशाः कार्यक्रमाः आयोज्यन्ते?

(घ) जनसंचारस्य सर्वेषां माध्यमानां वार्त्तास्रोतांसि कतिविधानि भवन्ति?

**23.** (क) व्यंग्यचित्रनिर्माणे व्यंग्यभाषाप्रयोगे च किम् अपेक्ष्यते? 1

(ख) शोधकार्यस्य तथ्यात्मकं ज्ञानं बहुजनहिताय कथं भवेत्? 1

**24.** (क) पत्रकारिता-व्यवसाये यत्र-तत्र स्थितान् समाचारान् पत्रिकाकार्यालये कः प्रेषयति? 1

(ख) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानाम् अनुपालनं कर्त्तव्यम्? 1

(ग) पत्रपत्रिकासु विषयाणां संयोजनं केन आधारेण क्रियते? 1

(घ) अशुद्धिनिराकरणे त्रुटिशोधकस्य कीदृशी दृष्टिः भवेत्? 1

(ङ) कोष्ठकचिह्नस्य कृते किं चिह्नं प्रयुज्यते? 1

★★★